# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा –** आचार्य-**1** | **सत्रम् – 1** | **गुणाः - 70** |
| **विषयः –** धर्मशास्त्रम् | **प्रश्नपत्रम् - 2 - CC - 4.1.1** | **समयः- 8 तः 11** |
| **दिनाङ्कः- 10/10/2019** | **सन्दर्भग्रन्थः –** निर्णयसिन्धुः (परिच्छेद-1) पारस्कगृह्यसूत्रम् | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 एकस्य व्याख्यानात्मकमुत्तरं लिखत ।** **05**

1. सौरमाससन्दर्भे राशीनां पुण्यकालनिर्णयविषये व्याख्यात्मकमुत्तरं लिखत ।
2. मलमासनिरूपणं कृत्वा तत्र कार्याकार्यं कर्मणां निरूपणं कुरुत ।

**प्र-2 एकस्य निबन्धात्मकमुत्तरं लिखत ।** **10**

1. देवपितृकार्ये पक्षनिर्णयं निरूपयत ।
2. देवपितृकार्ये प्रतिपदादितिथीनां निर्णयं निरूपयत ।

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 एकस्य व्याख्यानात्मकमुत्तरं लिखत ।** **05**

1. एकभक्तव्रतस्य ससन्दर्भं विशदतया निरूपणं कुरूत ।
2. व्रतारम्भकालस्य तन्नियमानाञ्च ससन्दर्भं विशदतया निरूपणं कुरुत ।

**प्र-4 एकस्य निबन्धात्मकमुत्तरं लिखत ।** **10**

1. प्रतिमास्वरूपं निरूपयत ।
2. दक्षिणानिर्णयं निरूपयत ।

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 एकस्य व्याख्यानात्मकमुत्तरं लिखत ।** **05**

1. स्त्रीशूद्रादीनां व्रतादिषु कर्तव्यतां निरूपयत ।
2. स्त्रीणां व्रतादौ उपवासे च आशौचविचारं सविस्तरं निरूपयत ।

**प्र-6 एकस्य निबन्धात्मकमुत्तरं लिखत ।** **10**

1. प्रतिपदातिथेः निर्णयं सविस्तरं विलिख्यताम् ।
2. एकादशीनिर्णयं सविस्तरं निरूपयत ।

**प्र-7 एकस्य व्याख्यानात्मकमुत्तरं लिखत ।** **05**

1. षडर्घ्या भवन्ति ...... - इति कारिकां प्रपूर्य सोदाहरणं व्याख्या कार्या ।
2. दर्शपूर्णमासव्रतदेवतापूजनादीनां विवेचनं कुरुत ।

**(चतुर्थान्वितिः - युनिट-4 )**

**प्र-8 एकस्य सविस्तरमुत्तरं लिखत। 10**

1. गृह्यसूत्रं नाम किम्, पारस्करगृह्यसूत्रस्य महत्वं लिखत।
2. षोडशसंस्कारनिरूपणं यथाग्रन्थं कुरुत।

**(पञ्चमान्वितिः - युनिट- 5 )**

**प्र-9 दशानां लघूत्तराणि लिखत। 10**

1. वर्षस्य कति प्रकाराः
2. काल-शब्दस्य व्याख्या देया।
3. चान्द्रवर्षस्य कति भेदाः
4. ऋतोः कति भेदाः
5. अयनं कतिविधम् नामानि लिखत।
6. अब्दः कति विधः
7. मासभेदाः कति के च ते
8. पितृकार्ये कः मासभेदः गण्यते
9. मलमासे श्राद्धं कर्तव्यं न वा
10. भद्रायाः अपरं नाम किम्
11. व्रतं कृत्वा क्रोधे कृते सति किं भवति
12. का एकादशी उत्तमा
13. पारस्करगृह्यसूत्रे कति काण्डानि सन्ति
14. पारस्करगृह्यसूत्रं केन वेदेन सम्बद्धम्
15. पारस्करमुनि-मतानुसारं कति संस्काराः

*********************